

दुर्गाष्टोत्तर-शतनामात्मक-स्तोत्रम्

खेमराज श्रीकृष्णदास प्रकाशन,
बम्बई

॥ दुर्गाष्टोत्तरशतनामात्मकस्तोत्रम् ॥

॥ उक्तं च विश्वसारतन्त्रे ॥

खेमराज श्रीकृष्णदास प्रकाशन, बम्बई

संस्करण - जनवरी २००५, सम्वत् २०६१. मूल्य : ५ रुपये मात्र

मुद्रक एवं प्रकाशक:

खेमराज श्रीकृष्णदास,™

अध्यक्ष : श्रीवेंकटेश्वर प्रेस,

खेमराज श्रीकृष्णदास मार्ग,

मुंबई - ४०० ००४.

Printers & Publishers
Khemraj Shrikrishnadass
Prop: Shri Venkateshwar Press
Khemraj Shrikrishnadass Marg,
7th Khetwadi, Mumbai - 400 004.

Web Site : http://www.khe-shri.com
E-mail : khemraj@vsnl.com

Printed by Sanjay Bajaj for M/s Khemraj Shrikrishnadass Prop. Shri Venkateshwar Press, Mumbai-400 004, at their ShriVenkateshwar Press, 66 Hadapsar Industrial Estate, Pune -411013.

॥ अथदुर्गाष्टोत्तरशतनामात्मकस्तोत्रम् ॥

॥ उक्तं च विश्वसारतन्त्रे ॥

॥ ईश्वर उवाच ॥

शत नाम प्रवक्ष्यामि शृणुष्व कमलानने ॥
यस्य प्रसादमात्रेण दुर्गा प्रीता सदा भवेत् ॥१॥
सती साध्वी भवप्रीता भवानी भवमोचिनी ॥
आर्या दुर्गा जया आद्या त्रिनेत्रा शूलधारिणी ॥२॥

पिनाकधारिणी चित्रा चन्द्रघण्टा महातपा ॥
मनो बुद्धिरहंकारा चित्तरूपा चिता चितिः ॥३॥
सर्वमन्त्रमयी सत्या सत्यानन्दस्वरूपिणी ॥
अनन्ता भाविनी भाव्या भवा भव्या सदागतिः ॥४॥
शम्भुपत्नी देवमाता चिन्तारत्नप्रिया सदा ॥
सर्वविद्या दक्षकन्या दक्षयज्ञविनाशिनी ॥५॥
अपर्णा चैकपर्णा च पाटला पाटलावती ॥
पट्टाम्बरपरीधाना कलमञ्जीरनादिनी ॥६॥

अमेयविक्रमा क्रूरा सुन्दरी कुलसुन्दरी ॥
वनदुर्गा च मातङ्गी मतङ्गमुनिपूजिता ॥७॥
ब्राह्मी माहेश्वरी चेन्द्री कौमारी वैष्णवी तथा ॥
चामुण्डा चैव वाराही लक्ष्मीश्च पुरुषाकृतिः ॥८॥
विमलोत्कर्षिणी ज्ञाना क्रिया सत्या च वाक्प्रदा ॥
बहुला बहुलप्रेमा सर्ववाहनवाहना ॥९॥
निशुम्भशुम्भहननी महिषासुरमर्दिनी ॥
मधुकैटभहन्त्री च चण्डमुण्डविनाशिनी ॥१०॥

सर्वासुरविनाशा च सर्वदानवघातिनी ॥
सर्वशास्त्रमयी विद्या सर्वास्त्रधारिणी तथा ॥११॥
अनेकशस्त्रहस्ता च अनेकास्त्रविधारिणी ॥
कुमारी चैव कन्या च कौमारी युवती यती ॥१२॥
अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा ॥
इदं च पठेत्स्तोत्रं दुर्गानामशताष्टकम् ॥१३॥
नासाध्यं विद्यते देवि त्रिषु लोकेषु पार्वति ॥
धनं धान्यं सुतान् जायां हयं हस्तिनमेव च ॥१४॥

चतुर्वर्गं तथा चान्ते लभेन्मुक्तिं च शाश्वतीम् ॥
कुमारीं पूजयित्वा च ध्यात्वा देवीं सुरेश्वरीम् ॥१५॥
पूजयेत्प्रयतो भक्त्या पठेन्नामशताष्टकम् ॥
तस्य सिद्धिर्भवेद्देवि सर्वैः सुरवरैरपि ॥१६॥
राजानो दासतां यान्ति राज्यश्रियमवाप्नुयात् ॥१७॥
गोरोचनालक्तककुंकुमेन सिन्दुरकर्पूरमधुत्रयेण ॥
विलिख्य यन्त्रं विधिना विधिज्ञो,
भवेत्सदा धारयतः स्मरारिः ॥१८॥

भौमावास्यां निशाभागे चन्द्रे शतभिषां गते ॥
विलिख्य प्रपठन् स्तोत्रं स भवेत्संपद पदम् ॥१९॥

इति श्रीहरिकृष्णविरचिते बृहज्ज्योतिषार्णवेऽष्टमे धर्मस्कन्धे
उपासनास्तबकेऽष्टाविंशत्यधिकशततमः श्रीदुर्गोपासनाकल्पद्रुमाध्याये
विश्वसारतन्त्रोक्त श्रीदुर्गाष्टोत्तरशतनामात्मकस्तोत्रं ॥

हमारे प्रकाशनों की अधिक जानकारी व खरीद के लिये हमारे निजी स्थान :

खेमराज श्रीकृष्णदास
अध्यक्ष : श्रीवेंकटेश्वर प्रेस,
९१/१०९, खेमराज श्रीकृष्णदास मार्ग,
७ वी खेतवाडी बॅक रोड कार्नर, मुंबई - ४०० ००४.
दूरभाष/फैक्स-०२२-२३८५७४५६.

खेमराज श्रीकृष्णदास
६६, हडपसर इण्डस्ट्रियल इस्टेट,पुणे - ४११ ०१३.
दूरभाष-०२०-२६८७१०२५, फैक्स -०२०-२६८७४९०७.

गंगाविष्णु श्रीकृष्णदास,
लक्ष्मी वेंकटेश्वर प्रेस व बुक डिपो
श्रीलक्ष्मीवेंकटेश्वर प्रेस बिल्डिंग,
जूना छापाखाना गली, अहिल्याबाई चौक,
कल्याण, जि. ठाणे, महाराष्ट्र - ४२१ ३०१.
दूरभाष - ०२५१-२२०९०६१.

खेमराज श्रीकृष्णदास
चौक, वाराणसी (उ.प्र.) २२१ ००१.
दूरभाष - ०५४२-२४२००७८.

KHEMRAJ SHRIKRISHNADASS